International Journal of Professional Development
Vol.11,No.2, July-Dec.2022 ISSN: 2277-517X (Print), 2279-0659 (Online)
Impact Factor: 3.983(IFSIJ)

# नव साहसाङ्क चरिते धर्मशास्त्र दृष्ट्या विवाह विवेचनम्

**अर्चना, शोधच्छात्रा**
श्री लाल बहादुर शास्त्री राष्ट्रीय संस्कृत विश्वविद्यालय
Mail id.- archanamanoj463@gmail.com

अखिल भूमण्डलेऽस्मिन्जनानां जीवनं कथंसम्भवंजातं, कथञ्च लोकस्यास्य लोकत्वंजातमितिश्रुतिः

**एतस्माज्जायतेप्राणोमनःसर्वेन्द्रियाणि च।**
**खंवायुर्ज्योतिरापःपृथिवीविश्वस्यधारिणी॥**

अत्र पृथिवी विश्वस्य धारिणी इयं पृथिवी संपूर्णं विश्वं धारयति विश्वस्य भावं विश्वास इति जनाचारः। सम्पूर्णे जगत्यस्मिन्मानवानां जीवनं कथं सुफलं साफल्यन्चैवस्यादिति जगद्धर्मः।

**उक्तञ्चमनुना**

**जगद्धितायरचितंसर्वंचराचरजीवनम्।**
**भूतानांप्राणिनःश्रेष्ठाःप्राणिनांबुद्धिजीविनः।**
**बुद्धिमस्तुनराःश्रेष्ठाःनरेषुब्राह्मणाःस्मृताः॥**

चराचर जगत्यस्मिन् भौतिका भौतिक सर्वपदार्थानां स्थानं भौतिक विज्ञाने वैज्ञानिकैः समुचितं प्रतिपादितं। परन्तु मनुस्मृतौ मानवस्य हितं सर्वं वर्तमाने कलौयुगे' इत्युक्त्वा मनुनामानव धर्मस्यरक्षायै इदं धर्मशास्त्रं शाश्वतंशास्त्रं इत्युक्तम् यस्मिन्देशे आचारः गुरु-शिष्यपरम्परया आगतः तस्यदेशस्य संस्कृति-सभ्यता-संस्कार- आचार-व्यवहारःकीदृशःभविष्यतीति विषये वक्तुं शक्यते वितनामूलं न तरवो,न सभ्यता संस्कृति विना।

**संस्कारेषु विवाह संस्कारः**

यथा ह्येकेनचक्रेण न रथस्य गति र्भवतित थैवस्त्रीं विना पुरूषस्यापि। यथाह भगवती श्रुतिः-पुरूषएवेदम् सर्वं यद्भूतंयच्चभाव्यम्। 'जन्मना जायतेशूदः संस्काराद् द्विज उच्यते'। विनामूलं न तरवो, जीवनं संस्कारं विना सम् उपसर्गपूर्वकात् कृ धातोः

**घन्प्रत्ययेननिष्पन्नोऽयं संस्कार शब्द**

आत्म शरीरान्यतर निष्ठोऽतिशय विशेषो वर्तते इत्यत्रास्ति। तथा चाह श्रीभाष्यकारः शारीर कमीमांसा भाष्येयत्संस्कारो नाम कार्यान्तर करण योग्यता इति। तथा च तत्टीकाकाराःलिख्यन्तेयत्-

**पुरूषातिशयादानंप्रोक्षणाद्यैश्च ये विदुः।**
**तेऽपि संस्कारकर्मत्वं तत्र तत्र न तत्यजुः॥**
**तत्त कर्मक्रियाजन्यः संस्कारः पुरूषाश्रयः।**
**तत्त सहकृतं कार्यं करोतीत्यवधारणात्॥ इति**

सम् उपसर्ग पूर्वकात् सम्स करणं सम्यक् करणं वा संस्कारः। भारतीयधर्मशास्त्रे मुख्यतया षोडशसंस्काराः मन्यन्ते। ते यथा-गर्भाधान-पुंसवन-सीमन्तोनयन- जातकर्म-नामकरण निष्क्रमण-विवाह अन्त्येष्टि च सर्वे संस्काराः श्रेष्ठाः पवित्राः सन्ति। परश्च एतेषु विवाहः श्रेष्ठतमसंस्कारो वर्तते। यथा-

**द्वितीयमायुषो भागं कृतदारो गृहे वसेत्।**

**विवाहशब्दस्योत्पत्तिः उद्देश्यन्च-**

'वि' उपसर्गात् 'वह' प्रापणे धातोः घन् प्रत्यये कृतेविवाहशब्दो निष्पद्यते। यद्यप्युपयम-परिणय उद्वाहादिशब्दा अस्य पर्यायवाचिनो भवन्ति, तथापि तेषु विशेषेण विवाहशब्दः स्त्रीणां कृते उद्वाहशब्दश्च पुरुषाणां कृते प्रयुज्यते। यदवतु स्त्रीपुरुषयोर्मिलनमेव विवाहशब्देन सामान्यतो बोध्यते। हिन्दूनां कृते विवाह एकं पवित्रबन्धनम्। तथा एकस्या भावेऽपरस्याङ्गहानिर्यथा प्रतीयते। स्त्री पुरूषस्यार्द्धाङ्गिनीति कथ्यते। स्त्रीशशब्दस्यापि सार्थकसंज्ञाः सन्ति। यथा यदा स्त्री पुरुषेण सहोपविश्य यज्ञादिकमनुतिष्ठति तदा सा पत्नी, यदस्यां कश्चित् काचिद्वा जायते तदाऽसौ जाया, या च सामान्येन भरणयोग्या सा भार्यापदेन व्यवह्रियते। अपत्नीकः पुरुषः यज्ञादिकमनुष्ठातुं नार्हति। तस्मात्योऽयज्ञीय इत्युच्यते। प्रसङ्गेस्मित्रुक्तं तैत्तिरीयब्राह्मणे" अयज्ञीयो वा एष योऽपत्नीक इति।

**विवाहस्योद्देश्यम्**

मुनिभिराश्रमचतुष्टयं कल्पितम्। शतायुर्वै पुरूष इति वचनानुसारेण पुरूषस्य समग्रमायुश्चतुर्द्धा विभज्य प्रथम भागे ब्रह्मचारी, द्वितीये भागे गृहस्थः, तृतीय भागे वानप्रस्थः चतुर्थभागे च सन्यासी भवति जनः। एतेषु चतुर्ष्वाश्रमेषु गृहस्थाश्रमस्य श्रेष्ठत्वं सर्वैः धर्मशास्त्रकारैः प्रतिपादितम्। यतो हि गृहस्थः सर्वेषामाश्रमाणां पालनकर्ता। कृतोपनयनो गुरुगृहे स्थित्वा वेदं वेदौ वेदान् वा यथाशक्ति समधीत्य गुरवेऽभिलषितं वस्तुं दक्षिणारूपेण दत्वास्नायात्। ततो स्नातको भूत्वा उत्तमलक्षणयुक्तामसपिण्डामसगोत्रानन्यूपविकां कान्तामुद्वह्य गृहस्थो भवेत्। प्रसङ्गेऽस्मिन् याज्ञवल्क्येन" प्रतिपादितं यत्-

अविप्लुतब्रह्मचर्यो लक्षण्यां स्त्रियमुद्रहेत्।
अनन्यपूर्विका कान्तामसपिण्डां यवीयसीम्॥

मुख्यतो विवाहस्योद्देश्यत्रयं विद्यते। पुत्रार्थं यज्ञार्थं रत्यर्थन्च। वंशवृद्धयर्थं पित्रूद्देश्येन पिण्डोदकनादार्थं च पुत्रस्यावश्यकता सुतरां विद्यते। पुत्रोत्पादनेन पिता स्वपितृऋणान्मुक्तो भवति। अतः पुत्रार्थं क्रियते भार्येत्युच्यते। पत्नीं विना पुरुषापूर्णो भवति। अपत्नीकः कर्मयोग्योऽपि न भवति। प्रसङ्गेऽस्मिन्नुक्तमपरार्कटीकायां याज्ञवल्क्येन" यत्-

**पत्नी धर्मार्थकामानां कारणं प्रवरं स्मृतम्।**
**अपत्नीको नरो भूप कर्मयोग्यो न जायते॥**

तस्माद् यज्ञाद्यनुष्ठानार्थं पत्नीग्रहणमप्यनिवार्यम् पुनश्च रतिसुखार्थमपि विवाहः क्रियते। तावियादिति वचनात् : तुकाले सीगमनस्य नित्यवात् सुस्थः पुरुषः सन्निधौ स्थितः स्त्रियमगच्छन् भ्रूणहत्यापापेन लिप्यत इति प्रत्यवायंश्रवणात् भवन्तीना कामविहन्ता पातकी स्वादिति पुरुषाणां कृते इन्द्रदत्त्वरश्रवणाच्च स्त्रीगमनस्यानिवार्यताऽपि श्रूयते। अतो धर्मार्थं पुत्रार्थं रत्यर्थन्च भार्या गृह्यते। भार्यां विना एकाकिना धर्मकार्यं यागादिकमनुष्ठातुं

www.ijpd.co.in

न शक्यते। पुत्र विना स्वर्गादिकः लब्धुं न शक्यत। रतिं विना च दैहिकं सुखं नोपलब्धुं शक्यते इति हेतोः विवाहः करणीय एव। तत्र च प्रयोजनत्रयमिति नास्त्यत्र काचिद् विप्रतिपतिरिति।

**नव साहसाङ्क चरिते विवाह**

यदि धर्मशास्त्रदृष्ट्या पश्यामश्चेत् नवसाहसाङ्कचरिते नायकनायिकायाः गान्धर्वविवाहः जातः ।नायकः सिन्धुराजः इन्दुमतिं दृष्ट्वा तां प्रति आसक्तः जातः तथा चा इन्दुमति अपि नायकस्य चित्रं दृष्ट्वा स्वात्मानं तं समर्पयति। अनन्तरं सिन्धुराजः नागराजस्य शत्रूणां विनाशं कृत्वा इन्दुमतिं स्वपत्निरूपेण स्वीकरोति।

नवसाहसाङ्कचरिते अन्यप्रकीर्णधर्मशास्त्रीयविन्दूनामुल्लेखः

नैकधार्मिकविधयो विशेषव्यय-साध्याः, तपसा, सामग्रीबाहुल्येन वा सम्पादनीयाः सन्ति। तेषां स्थाने न्यूनोपादनेनानायासेन चापि धर्मक्रियाणां सुकरत्वं सम्यग्विहितं मनुना तथा हि सरलीकृतपाप-शोधनविधानं मनुना प्रस्तावितमधीविधम्-

**ख्यापनेनानुतापेन तपसाध्ययनेन च।**
**पापकृतमुच्यते पापात्तथा दानेन चापदि॥**

द्रव्ययज्ञस्य सविशेषं महत्वं वैदिकयुगारम्भतो प्रबभूव। तस्य स्थाने मनुः सूक्ष्मयज्ञान् समर्थयामास स कथयति - अहुतं हुतं प्रहुतं ब्राह्महुतं प्राशित चैत्येतानि पन्चमहायज्ञाः। सूक्ष्मतमाः सन्ति ब्रह्मसंस्थानां महायज्ञाः। तत्र वाचि प्राणस्य, प्राणे च वाचो हवनं विधीयते। " इन्द्रियेषु हवनं (इन्द्रियसंयमः) महायज्ञः। महापातकमेव ब्राह्मणहत्या। तस्मात् पापाद् विमुक्तये कत्रच्छ तमानि व्रतानि निर्धारितानि बभूवुः। तदुदिश्यते समानि सुसरलानि व्रतानि विहितानि दृश्यन्ते तथा हि तदर्थं कत्रच्छ्रतमा-व्रतानि सन्ति-

- युद्धभूमौ स्वेच्छया शस्त्रभृतां लक्ष्यं भवेत। अग्नावात्मानं त्रिः प्रास्येत्।11,228' अद्धतं तु जपः हुतं होमः भूतानां कृते बलिदानम् प्रहुतम्। विप्रपूजा तु बाह्यहुतम्। प्राशितं हि पितृतर्पणम्
- गवार्थे ब्राह्मणार्थे वा सद्यः प्राणान् परित्यजेत्॥

**विकल्पेन तदर्थसरलव्रतानि**

- मितभुक जितेन्द्रियोऽन्यतमं वेदं जपन् योजनानां शतं व्रजेत्। अनेन देशस्य सन्दर्शनेन राष्ट्रियैकता संभाविता।
- वेदविदुषं धनं गृहं च सपरिच्छदं दद्यात्।
- नियताहारस्त्रिवेदस्य सहिता जपेत्॥"
- कृतवापनो निवसेद् ग्रामान्ते ग्रोव्रजेऽपि वा॥
- आश्रमे वृक्षमूले वा गोब्राह्मणहिते रतः॥ "
- अश्वमेधेऽवभृथस्नातो विमुच्यते।"

संस्काराणां महती प्रतिष्ठासीत् वैदिकयुगे स्त्रीपुरूषोभयोः कृते विशिष्टसंस्कारेष्वन्य- तममुपनयनं स्त्रीणां कृते मनुना विलपितमेव सरलीकरण योजनया। तद्यथा 'पतिसेवा गुरौ वासो गृहार्थोऽग्निपरिक्रिया।" अर्थात् कन्या पन्चमे वर्षेऽपि उद्वाह्य पतिसेवां करोत्विति तस्या गुरूगृहे वास एवं प्रतिदिनं ब्रह्मचारी अग्निहोत्रमन्वतिष्ठत्। तस्य स्थाने स्त्री पतिगृहे गृहकार्यं करोतु। अत्र स्मरणीयं वर्तते यन्मनुः स्त्रीणां कृते विवाहावस्थां हास्यास्पदमेव न्यूनीकृतवान , यतो हि नाम तस्या ब्रह्मचर्यव्रतपालनस्यावसरोऽवच्छिन्न आसीत्। मनुयुगे ब्रह्मचर्याय प्राक्तनगुरूगृहगमनकाले कन्या वधूभूय पतिग्रहमगच्छत्। सरलीकरणविधानेन मनुरुपनयन विवाःयौरैक्यं विभावितवान् कन्यकानां कृते।

क्वचित् सरलीकरणं तु धर्मपथस्य लोकप्रियतां विधातुमेव प्रकल्पितं भवेत्।वस्तुतोऽधिकाधिकतपोयोगेन महतीं सिद्धिं महतामेव जायते इति परमं सत्यम्।

मातरि, पितरि आचार्ये च भक्तिः परो धर्मः।" इति धर्मस्य सरलतमं स्वरूपम् मनुर्धर्मविधानेन सामाजिकव्यवस्थां समुन्नयन् धर्मसाफल्यं वितनोति। तथापि मोक्षादिकस्याधिकारिणः सरलसरलया पद्धत्या पुत्रपौत्रलाभेनापि सम्भावयति तथा हि-

**पुत्रेण लोकान्जयति पौत्रेणानन्त्यमश्नुते**
**अथ पुत्रस्य पौत्रेण ब्रध्नस्याप्नोति विष्टपम्॥**

अश्वमेधादियज्ञानां बहुव्ययसाध्यानां स्थाने मांसभोजनत्याग एव पर्याप्तफलदायक इति मनो

पूर्वोक्तं मन्तव्यं प्रकाशयति। नैकधर्मशास्त्रेषु वानप्रस्थानां कृते प्रतिदिनं पन्चमहायज्ञेनाग्नौ हवनं निर्धारितमस्ति। मनुः प्रवदति- वानप्रस्थो निरग्निर्भवेत्। अर्थात् तस्य हवनस्यावश्यकता नास्ति। ब्रह्मप्राप्तये ब्रह्मचर्य तपो योगा दीनामावश्यकतान्यत्र प्रतिपादिता। एतस्मै प्रयोजनाय सरलीकृत मार्गो मनुना प्रकाशितः यथा -

**त्रिवर्षाणि गायत्री जपेन परं ब्रह्माभ्येति।'**
**एवं यः सर्वभूतानि ब्राह्मणो नित्यमर्चति**
**स गच्छति परं स्थानं तेजोमूर्ति पथर्जुना।"**

अन्यच्च नैष्ठिकब्रह्मचारी उत्तमं स्थानं गच्छति। न पुनराजायते यावज्जीवं मातापित्राचार्यसेवया भक्तोऽमृतत्वं लभते।

जपयज्ञः सर्वयज्ञेषु श्रेष्ठः। मनुर्विधियज्ञस्यापेक्षया जपयज्ञस्योत्कर्षं प्रतिपादयति। वेदोदितेन कर्मणा परमा गतिः प्राप्या वस्तुतो वेदोदितकर्मणा स्वर्ग एव प्राप्यः। मनुस्तेनैव ब्रह्मलोक- प्राप्तिमपि सम्भावयति। वानप्रस्थानां संन्यासाश्रमिणां कष्टपरिप्लुतजीवनं विनापि भावमात्रेण ब्रह्मपदप्राप्तिरिति सरलपथं तेन प्रतिपादितम्।

अग्निहोत्रं वैदिकसंस्कृतेरनिवार्यं विधानं प्राचरत्। अग्निहोत्रस्य दुःसाध्यप्रक्रियाया: स्थाने ब्राह्मणभोजनं श्रेयस्करमिति मनुमतमधोविधं विवत्रतम् वरिष्ठमग्निहोत्रेभ्यो ब्राह्मणस्य मुखे हुतम्।

यदि कश्चिद्राजा भूतानि रक्षति, दण्डनीयात् दण्डयति च स प्रत्यहं सहस्रशतदक्षिणवज्ञानां सम्पादनस्य फलं लभते अत्र स्वकर्तव्य पालनमेव श्रेष्ठयज्ञस्थानीयम्। राजा सुशासनेन प्राप्नोति- परमां गतिम्। साधारणतः परमा गतिर्ब्रह्मवित्वेन तपसा योगेन वा लभ्या मन्यते॥ सरलीकरणविधानेन मोक्षपथः सुगमो जातः। तपस्स्थाने मातापित्राचार्याणां सेवा अथवा वेदाभ्यासः अथवा प्राणायामः मनुना निर्दिष्टाः। प्रकरणेऽस्मिन् मनुः शरीरस्य कष्टकारकतपो न गणयति।



www.ijpd.co.in

तस्यानुसारेण ब्राह्मणानां ज्ञानार्जन, क्षत्रियाणां प्रजारक्षणं वैश्यानां वार्ता, शूद्राणां शिल्पादिभिर्लोकसेवा च तपः सन्ति।

**शिष्टाचारः सदाचारश्च-**

चतुर्णां वर्णानामाचारो मनुना विशदीकृतः । आचारः परमो धर्मः । आचारयुक्तः स्यात् विशेषतो ब्राह्मणः। तस्या- चारवृत्तं (सदृत्तं) शूद्रैरपि अनुकरणीयम्।

**मनोर्वाचा प्रमाणितम्** – धर्ममूलः सदाचारः। आचारः परमो धर्म इति । सदाचारो धर्मस्य लक्षणम्।" सर्वस्य तपसो मूलमाचारो जगत्रहुः परम्। एवमाचारतो दृष्ट्वा धर्मस्य मनुयो गतिम् । सदाचारवान् शतं वर्षाणि जीवति।" साधूनामाचारो धर्मः ।

राजापि शिष्टाचार सम्मन समाचरेदिति मनु-वचनम् अत्र महत्तमं विशेषं भजतेऽधोवाक्यम्-श्रोत्रियं व्याधितातां बालवृद्धावकिन्चनम्। महाकुलीनमायं च राजा सम्पूजयेत् सदा। अथ व लोको 'मंगलाचार युक्तः स्यात् प्रयतात्मा जितेन्द्रियः ।

**संदर्भग्रन्थाः**


- मनुस्मृति
- याज्ञवल्क्यस्मृतिः
- तैत्तिरीयोपनिषद्
- ऐतरेयोपनिषद्
- गीता